ग्रहयज्ञप्रारंभः

श्रीगणेशायनमः॥अथग्रहयज्ञः॥देशकालौसंकीर्त्य॥अमुककर्मांग
भूतंग्रहयज्ञंकरिष्ये॥ईशान्यांहस्तमात्रंग्रहवेदिंकृत्वातस्योपरिवस्त्रेसां
गग्रहांस्थापयेत्॥प्रणवस्यपरब्रह्मऋषिः परमात्मादेवता।देवीगायत्री
छंदेवीउष्णिक्कूदेवीबृहत्यश्छंदांसि।सूर्यादिग्रहावाहनेविनियोगः॥तत्रग्रह
पीठमध्येवर्तुलेद्वादशांगुलेमंडलेप्राङ्मुखंसूर्यंरक्तपुष्याक्षतैरावाह्य॥
आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्।सूर्यावाहनेविनियोगः।आकृ-ष्ण्
ॐभूर्भुवस्वः।कलिंगदेशोद्भवकाश्यपसगोत्रसूर्येहागच्छेहतिष्ठेतिस्था १
पयेत्॥१॥आग्नेयेचतुरस्रेचतुर्वेशांगुलेमंडलेप्रत्यङ्मुखंसोमंश्वेतपुष्पा

क्षतैः।आप्यायस्वगौतमःसोमोगायत्री।सोमावा०।ॐआप्यायस्व०मधे।
भू०।यमुनातीरोद्भवआत्रेयसगोत्रसोमेहागच्छे०॥दक्षिणेत्रिकोणेत्र्यंगुले
मंडलेदक्षिणामुखंभौमंरक्तपुष्याक्षतैः।अग्निर्मूर्धादिरूपोंगारकोगाय
त्रीअंगारकावा०ॐअग्निर्मूर्द्धा०न्वति।भू०।अवंतीसमुद्भवभारद्वाजसगोत्र
भौमेहा०॥ईशान्येबाणाकारेचतुरंगुलेमंडलेउदङ्मुखंबुधंपीतपुष्याक्षतैः
उद्बुध्यध्वंबुधःसोम्योबुधस्त्रिष्टुप्।बुधावा०।ॐउद्बुध्यध्वं०येवः।भू०॥
मगधदेशोद्भवआत्रेयसगोत्रबुधेहा०।उत्तरेदीर्घचतुरस्रेषडंगुलेमंडले
उदङ्मुखंबृहस्पतिंपीतपुष्याक्षतैः।बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पू।बृहस्पत्यावा०ॐबृहस्पतेअ०त्रिरं।भू०॥सिंधुदेशोद्भवआंगिरसगोत्र
बृहस्पतेहा०।पूर्वपंचकोणेनवांगुलेमंडलेप्राङ्मुखंश्वेतंश्वेतपुष्पाक्षतैः।
शुक्रःपाराशरःशुक्रोद्विपदाविराट्।शुक्रावा०ॐशुक्रःशुभु०ज्योतिः॥भू०।
भोजकटदेशोद्भवभार्गवगोत्रशुक्रेहा०॥पश्चिमेधनुराकारेषडंगुलेमंडले
पत्यङ्मुखंशनिंनीलपुष्पाक्षतैः।शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा।शन्न
वा०।ॐशंनोमित्र०शिवः।भू०।सौराष्ट्रदेशोद्भवकाश्यपगोत्रशनैश्चरेहा
गच्छे०॥नैर्ऋत्येशूर्पाकारेद्वादशांगुलेमंडलेदक्षिणामुखंराहुं कृष्णपुष्पा
क्षतैः।कयानोवामदेवोराहुर्गायत्री॥राहुावाह०ॐकयानश्चित्र०वृता॥

MEMORIAL

भू०।राठिनापुरोद्भवपैठीनसगोत्रराहोइहागच्छेह०॥वायव्येध्वजाकारेषडं
गुलेमंडलेदक्षिणामुखंकेतुंधूम्रपुष्पाक्षतैः।केतुर्मधुच्छंदाःकेतुर्गाय
त्री।केत्वावाह०।ॐकेतुंकृण्व०यथा।।ॐभूर्भुवस्वःॐकंतर्वेदीसमुद्भव
जैमिनिसगोत्रकेतोइहा०।।तन्नत्पुष्पाक्षताभावेयथाप्राप्तैः॥अथाधिदे
वताः।त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्।ईश्वरावाहनेवि०ॐत्र्यंबकंय०तात्।
ईश्वरेहागच्छे०सूर्यदक्षिणपार्श्वेईश्वरंआवाहयामि।गौरीर्मिमायदीर्घ
तमाउमाजगती।उमावा०ॐगौरीर्मिमाय०मन्।उमेहागच्छे०सोमद
क्षिणपार्श्वेउमांआ०॥यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप्।स्कंदावाहने०।

ग्रह० ॐ यदक्रंदः प्र० र्वन्॥स्कंदेहागच्छ० भौमदक्षिणपार्श्वेस्कंदंआवा०॥विष्णो
२ र्नुकंदीर्घतमानारायणस्त्रिष्टुप्।नारायणावाह०ॐविष्णोर्नुकं०हुगायः॥
नारायणेहा०बुधदक्षिणपार्श्वेनारायणं॥ब्रह्मजज्ञानगौतमोवामदेवोब्रह्मा
त्रिष्टुप्।ब्रह्मावाहने०ॐब्रह्मजज्ञानं०विवः।ब्रह्मन्इहागच्छ०बृहस्पतिदे
क्षिणपार्श्वेब्रह्माणं०॥इदंवोमधुछंदाइंद्रोगायत्री।इंद्रावाहनेवि०ॐइंद्रंवो
विश्वतः०वलः।इंद्रइहा०।शुक्रदक्षिणपार्श्वेइंद्रं०॥यमायसोमंयमोयमो
नुष्टुप्।यमावाहने०ॐयमायसोमं०मृतः॥यमइहागच्छ०शनिदक्षिणपा २
र्श्वेयमंआवा०॥मोषुणोघोराकण्वःकालोगायत्री।कालावाहने०ॐमोषुणः

पारा०सहकालइहागच्छ०राहुदक्षिणपार्श्वेकालंआ०॥उषोवाजंप्रस्क
ण्वश्चित्रगुप्तोबृहती।चित्रगुप्तावा०ॐउषोवाजंहि०क्रयः॥चित्रगुप्तइ
हागच्छ०केतुदक्षिणपार्श्वेचित्रगुप्तंआ०॥ततःशुक्लतंडुलैःसूर्यादिग्रह
धिदेवताः॥अग्निंकाण्वोमेधातिथिरग्निर्गायत्री।अग्न्यावा०ॐअग्निंदू
तं०क्रतुं।अग्नेइहा०सूर्यवामपार्श्वेअग्निंआ०॥अप्सुमेमेधातिथिरापोनु
ष्टुप्।अपावाह०ॐअप्सुमेसो०भेषजीः।अपइहागच्छ०सोमवामपार्श्वे
अपआ०॥स्योनामेधातिथिर्भूमिर्गायत्री।भूम्यावाहने०ॐस्योनापृथिवि०
प्रथः।भूमेइहा०भौमवामपार्श्वेभूमिंआ०॥इदंविष्णुर्मेधातिथिर्विष्णुर्गा

यत्री। विष्णवावाह०ॐइदं विष्णुर्वि०सुरे। विष्णोरहाग०बुधवामपार्श्वेविष्ण
वे०॥ इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप्। इंद्रावाह०ॐइंद्रश्रेष्ठानि०मङ्क्ष्वा॥
इंद्रइहा०गुरुवामपार्श्वेइंद्रं०॥ इंद्राणीवृषाकपिरिंद्राणीपंक्तिः। इंद्राण्यावा
ह०ॐइंद्राणीमासुना०भरः॥ इंद्राणीहाग०शुक्रवामपार्श्वेइंद्राणीआ०॥
प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्। प्रजापत्यावा०ॐप्रजापतेन०यीणां॥
ॐप्रजापतेइहा०ग्नानिवामपार्श्वेप्रजापतिमा०॥ आयंगौःसार्पराज्ञिःसर्पगाय
त्री। सर्पावाह०ॐआयंगौःपृश्नि०यंत्स्वः॥ सर्पइहा०राहुवामपार्श्वेसर्पनिआ०
ब्रह्मजज्ञानंगौतमोब्रह्मात्रिष्टुप्। ब्रह्मावाह०ॐब्रह्मजज्ञानं०भ्रविवः॥ ब्र

ह्मन्इहा०केतुवामपार्श्वेब्रह्माणंआ०॥ ऋतुसंरक्षकदेवताः॥ गणानांत्वाग्नो
नकोगृत्समदोगणपतिर्जगती। गणपत्यावा०ॐगणानांत्वा०दनं। गणपते
इहा०राहुरुत्तरतोगणपतिं॥ जातवेदसेकश्यपोदुर्गात्रिष्टुप्। दुर्गावा०ॐ
जातवेदसे०त्यग्निः॥ दुर्गेहागछे०ग्नानिरुत्तरतोदुर्गाः। तववायोव्यश्वांगिर
सोवायुर्गायत्री। वाय्वावा०ॐतववाय०महो। वायोइहा०रवेरुत्तरतोवायुं०॥
आदित्वत्सआकाशोगायत्री। आकाशावाह०ॐआदित्यत्वस्थिरो०दिवा। आ
काशइहा०राहोर्दक्षिणआकाशं०॥ एषोउषाप्रस्कण्वोश्विनौगायत्री अश्या
वा०ॐएषोउषाअ०हतः। अश्विनौइहा०केतुर्दक्षिणतःअश्विनौआ०॥

ततःक्षेत्रस्यपतिनावादेवःक्षेत्रपालोनुष्टुप्।क्षेत्रपालावा०क्षेत्रस्यपतिना०
दृशे॥क्षेत्रपालइहाग०उत्तरेक्षेत्रपालं०॥वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रि
ष्टुप्।वास्तोष्पत्यावा०ॐवास्तोष्पतेप्र०ष्पदे।वास्तोष्पतेइहा०उत्तरेवास्तो
ष्पतिं०॥ ततोलोकपालान्॥इंद्रंविश्वाजेतामधुछंदइंद्रोनुष्टुप्।इंद्रावाह०ॐ
इंद्रंविश्वाअ०पतिं।इंद्रेहा०पूर्वस्यांइंद्रंआ०॥अग्निंकाण्वोमेधातिथिरग्नि
र्गायत्री।अग्न्यावाह०ॐअग्निंदूतंवृ०क्तुं।अग्नेइहा०अग्नेयांअग्निंआ॥
यमायसोमंयमोयमोनुष्टुप्।यमावाह०ॐयमायसोमं०हृतः।यमेहाग०
दक्षिणस्यांयमंआ०॥मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री।निर्ऋत्यावा०ॐ

मोषुणःप०सह।निर्ऋतेइहा०नैर्ऋत्यांनिर्ऋतिं॥तत्वायामिशुन्राशेपोव
रुणस्त्रिष्टुप्।वरुणावा०ॐतत्वायामि०मोषीः।वरुणइहा०पश्चिमस्यांव
रुणंआ०॥तववायोऽयश्चांगिरसोवायुर्गायत्री।वाय्वावाह०ॐतववायवृ०
महे।वायोइहा०वायव्यांवायुं०॥सोमोधेनुर्गोतमःसोमस्त्रिष्टुप्।सोमावा०
ॐसोमोधेनुं०दस्मेभ्यःसोमइहा०उत्तरस्यांसोमंआ०॥तमीशानंगोतमई
शानोजगती।ईशान्यावा०ॐतमीशानं०स्तुषे।ईशानइहा०ईशान्यांईशा
नंआ०॥ॐतदस्तुमित्रावरुणायतत्पश्चाद्वेशतिष्ठासु०प्रतिष्ठाइतिप्रतिष्ठा
प्यपूजयेत्॥सूर्यादिवाहितदेवताभ्योनमःपाद्यंसमर्पयामीत्यादि॥ततः।

ईशान्यांकलशंमहीद्यौःपृथिवीवनइत्यादिसंस्थाप्यपूजयेत्। वरुणायनमः
पाद्यंस०।प्रार्थयेत्॥कलशस्यमुखे०श्रिताः॥अत्रगायत्री०आयांतुयजमान
स्यदुरितक्षयकारकाः॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसित
राकुंभविधृतोविष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः।त्व
यितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः।शिवःस्वयंत्वमेवासिविष्णुस्त्वंच
प्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेपि
यतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव।सान्निध्यंकुरु
देवेशप्रसन्नोभवसर्वदा॥ततोन्वाधानं॥समिद्वयमादाय॥क्रियमाणेअमु

ककर्महोमेदेवतापरियहार्थमन्वाधानंकरिष्ये।अस्मिन्नन्वाहितेग्नौज्ञात
वेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येन।अग्नीषोमौच
क्षुषीआज्येना।अत्रप्रधानं।सवितारं।सोमं।बुधं।बृहस्पतिं।भृगुं।शनैश्च
रं।राहुं।केतुं।एताःप्रधानदेवताःप्रतिद्रव्यंअमुकसंख्याभिः।अर्कादिसमि
द्भिश्चरुघृताक्ततिलाज्याहुतिभिः।अधिदेवताःप्रत्यधिदेवताः।ईश्वरं।उ
मां।स्कंदं।नारायणं।ब्रह्माणं।इंद्रं।यमं।कालं।चित्रगुप्तं।अग्निंअपःभू
मिं।विष्णुं।इंद्रं।इंद्राणीं।प्रजापतिं।सर्पान्।ब्रह्माणं।एताः।अधिदेवताः।
प्रत्यधिदेवताश्चअमुकसंख्याभिस्तैरेवद्रव्यैः।गणपतिं।दुर्गां।वायुं।आ

काशं॰अश्विनौ॰वास्तोष्पतिं॰क्षेत्रपालं॰इंद्रं॰अग्निं॰यमं॰निर्ऋतिं॰वरुणं॰
वायुं॰सोमं॰ईशानं॰एताः क्षुक्संरक्षकदेवताः अमुकसंख्याभिस्तैरवद्रव्यै
र्यक्ष्ये॥मुख्यघधानदेवताद्रव्यसंख्याश्चोक्ता॰ग्रोषेणस्विष्टकृतमित्यादिसयो
यक्ष्ये॰इत्यंतमुक्त्वा॥समिद्व्यहोमांतंकृत्वा॰परिसमूहनाद्याऽप्यभागांतंकृ
त्वा॰यजमानोद्रव्यत्यागंकुर्यात्॰इदंउपकल्पितद्रव्यंयायायष्यमाणदेवता
स्ताभ्यस्ताभ्यः इदंहवनीयद्रव्यंमयापरित्यक्तंनमम॥इत्युक्त्वाऋत्विजेर्यथो
क्तहोमंकुर्यात्॰ततःस्विष्टकृदादिप्रायश्चित्तहोमांतंकृत्वाबलिदानंकुर्यात्
तत्रक्रमः॰सर्वमंत्रैर्ऋष्याद्यक्त्वा॥ॐत्रातारमिंद्र॰मित्रंइंद्रः॰इंद्रायसांगायस

परिवारायसायुधायससशक्तिकायइमंसदीपंमाषभक्तबलिंसमर्पयामि॰भो
इंद्रदिशंरक्षबलिंभक्षममयजमानस्यवासहकुटुंबस्यआयुःकर्त्रीक्षेमक
र्त्रीभुभकर्त्रीशांतिकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीआरोग्यकर्त्रीवरदाभव॥एवं
सर्वत्र॰अग्निंदूतं॰ऋतुं॰अग्नयेसांगा॰भोअग्नेदिशं॰भव॰यमायसो॰यमा
यसांगा॰भोयमदि॰भव॰मोषुणाप॰निर्ऋतेसां॰भोनिर्ऋतेदिशं॰तत्वाया
मि॰वरुणायसांगा॰भोवरुणदिशं॰॥तववाय॰वायवेसांगा॰भोवायोदिशं॰
सोमोधेनुं॰सोमायसांगा॰भोसोमदिशं॰तमीशानंज॰ईशानायसां॰भोई
शानदिशं॰॥अथग्रहाः॥आकृष्णेन॰सूर्यायसांगाय॰ससशक्तिकायईश्वरा



त्रिरूपाधिदेवताप्रत्यधिदेवतासहितायइमंसदीपंमाषभक्तबलिंसमर्पयामि॥
भोसूर्यइमंबलिंगृहाणममसकलकुटुंबस्यआ॰॥आप्यायस्व॰सोमायसां॰
क्तिकायउमापाधिदे॰भोसोमइमंबलिंगृहाणममसहकु॰॥अग्निमूर्द्धा॰
अंगारकायसां॰क्तिकायस्कंदभूमिरूपाधिदे॰भोअंगारकइमंबलिंगृहाण॰
उद्बुध्यध्वं॰बुधायसां॰क्तिकायनारायणविष्णुरूपाधिदे॰भोबुधइमंबलिंगृ॰
बृहस्पते॰बृहस्पतेसां॰क्तिकायब्रह्मेंद्ररूपाधिदे॰भोबृहस्पतेइमंबलिंगृहा॰
शुक्रःशुशुक्रं॰शुक्रायसां॰इंद्रेंद्राणीरूपाधि॰भोशुक्रइमंबलिंगृहाणममस॰
शमग्निर॰शनैश्चरायसां॰यमप्रजापतिरूपाधि॰भोशनैश्चरइमंबलिंगृहा॰

कयानश्चित्र॰राहवेसांगा॰कालसर्परूपाधि॰भोराहोइमंबलिंगृहाणम॰
केतुंकृण्वन्न॰केतवेसां॰कायचित्रगुप्तब्रह्मरूपाधि॰भोकेतोइमंबलिंगृहा॰
गणानांत्वा॰गणेशायसां॰क्तिकायऋद्धिबुद्धिसहितायइमंसदी॰भोगणपते
इमंबलिंगृहाणममस॰॥जातवेदसे॰दुर्गायैसांगायैसपरिवारायैसायुधायै
सशक्तिकायैइमंसदी॰भोदुर्गेइमंबलिंगृहाणममसहकुटुंबस्यआयुःकत्रक्षे
मकत्रक्षुभकत्रक्षांतिकत्रक्षपुष्टिकत्रक्षतुष्टिकत्रक्षनिर्विघ्नकत्रक्षवरदा॰॥तन्वा
यदृत॰वायवेसां॰भोवायोइमंबलिंगृहाणममस॰॥आदित्यत्वत्स्थरे॰आ
काशायसांगाय॰भोआकाशइमंबलिंगृहाणममस॰एषोउषाअपू॰अग्नि

भ्यांसांगाभ्यांसपरिवाराभ्यांसायुधाभ्यांसशक्तिकाभ्यांइमंसदी०भोअश्विनौइमं
बलिंगृह्णीतंममसकुलेदुंबस्यायुःकर्त्तारौक्षेमकर्त्तारौशुभकर्त्तारौशांतिकर्त्तारौ
पुष्टिकर्त्तारौतुष्टिकर्त्तारौनिर्विघ्नकर्त्तारौभवतं॥ॐवास्तोष्पतेप्र०वास्तोष्पतेसां
गा०भोवास्तोष्पतेइमंबलिंगृहाणममस०॥ततःक्षेत्रपालबलिषु॥पूजयेत्।
मंत्रेणबलिंगृह्णंत्विलिपठेत्॥क्षेत्रस्यपतिनावयं०क्षेत्रपालायसांगायसपरिवा
रायसायुधायसशक्तिकायभूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकि
नीवेताळारिसपरिवारयुतायइमंसदीपंसतांबूलंसदक्षिणाकंमाष०भोभोक्षे
त्रपाल्इमंबलिंगृहाणममस०दोभव॥इतिसंप्रार्थ्य॥शांतापृथिवीशिवमं

तरिक्षंद्यौर्नोदिव्यभयन्नोअस्तु॥शिवादिशःप्रदिशाउद्दिशोनआपोविद्युतःप
रिपांतुसर्वतःशांतिःशांतिःशांतिः॥हस्तपादान्प्रक्षाल्याचम्य॥पूर्णाहुतिंकु
र्यात्॥आज्यंस्रुचिद्वादशागृहीतंगृहीत्वा॥फलादियजमानोगृहीत्वा॥समुद्र
दूर्मिरित्येकादशार्चस्यगौतमोवामदेवोग्निस्त्रिष्टुप्॥पूर्णाहुतिहोमे०मूर्द्धानं
दिवोबार्हस्पत्योभारद्वाजोवैश्वानरस्त्रिष्टुप्॥पूर्णाहु०ॐमूर्द्धानंदिवो०देवा॥
पुनस्त्वाग्निर्बसुरुद्राःशतंक्रतुरनुष्टुप्॥पूर्णा०ॐपुनस्त्वादित्यारुद्रावसवः
समिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैःघृतेनत्वंतनुवोवर्द्धयस्वसत्याःसंतुय
जमानस्यकामाः॥पूर्णादर्विविश्वेदेवाःशतंक्रतुरनुष्टुप्॥पूर्णा०ओंपूर्णाद

र्विपरापतसुपूर्णापुनरापत।वस्मेवविक्रीणावहाइषमूर्जंशतक्रतो।सप्त
तेअग्नेसप्तसमिधःसप्तजिह्वाःसप्तर्षयः
सप्तधामप्रियाणि।सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेन॥
धामंतेविश्वमदेवआपोजगती।पूर्णा०ॐधामंते०ऊर्मिस्त्वाहा।अग्नयेवैश्वा
नरायवसुरुद्रादित्येभ्यःशतक्रतवेसप्तवतेअग्नयेअङ्गिरस्वतेमम॥ततःपू
र्णपात्रविमोकादिसंस्रुवाज्यांतंकृत्वा॥कलशाज्जलंपात्रांतरेगृहीत्वापल्लवादी
नांयजमानंसपत्नीकंमभिषिंचेत्आचार्यादिभिः।अभिषेकेपत्नीवामतः॥ १०
समुद्रज्येष्ठादि०अथदेवमंत्राः॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्व

राः।वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥१॥प्रद्युम्नश्चानिरुद्धश्चभवं
तुविजयायते।आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा॥२॥वरुणःपवनश्चै
वधनाध्यक्षस्तथाशिवः।ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेसदा॥३॥की
र्तिर्लक्ष्मीधृतिर्मेधापुष्टिश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिःकांतिस्तुष्टि
श्चमातरः॥४॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥आदित्यश्चंद्रमाभौ
मोबुधजीवसितार्कजाः॥५॥ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः॥देवदा
नवगंधर्वायक्षराक्षसपन्नगाः॥६॥ऋषयोमुनयोगावोदेवमातरएवच॥देवप
त्न्योदुमानागदैत्याश्चाप्सरसांगणाः॥७॥अस्त्राणिसर्वशास्त्राणिराजानोवा

हनानिच॥ओषधानिचरत्नानिकालस्यावयवाश्चये॥८॥सरितःसागराःशैलास्तीर्थानिजलदानदाः॥एतास्त्वामभिषिंचंतुसर्वकामार्थसिद्धये॥९॥ग्रहमंत्राः॥ग्रहाणामादिरादित्योलोककरक्षणकारकः॥विषमस्थानसंभूतांपीडांदहतुमेरविः॥१॥रोहिणीशःसुधामूर्तिःसुधागात्रःसुधाश्रयः॥विषमस्थानसंभूतांपिडांदहतुमेविधुः॥२॥भूमिपुत्रोमहातेजोजगतांभयकृत्सदा॥वृष्टिकृद्वृष्टिहर्त्ताचपीडांदहतुमेकुजः॥३॥उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः॥सूर्यप्रियकरोविद्वान्पीडांदहतुमेबुधः॥४॥देवमंत्रीविशालाक्षःसदालोकहितेरतःअनेकशिष्यैः संपूर्णःपीडांदहतुमेगुरुः॥५॥दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः॥प्रभुस्ता

राग्रहाणांचपीडांदहतुमेभृगुः॥६॥सूर्यपुत्रोदीर्घदेहोविशालाक्षःशिवप्रियः॥मंदचारःप्रसन्नात्मापीडांदहतुमेशनिः॥७॥महाशिरोमहावक्त्रोदीर्घदंष्ट्रोमहाबलः॥अतनुश्चोर्ध्वकेशश्चपीडांदहतुमेतमः॥८॥अनेकरूपवर्णैश्चशतशोथसहस्रशः॥उत्पातरूपोजगतांपीडांदहतुमेशिखी॥९॥इतिग्रहमंत्राः॥शुक्रौशुक्रोबृहस्पतेयौगुरुसौम्यउदङ्मुखौ॥प्रत्यङ्मुखःशनिःसोमःशेषादक्षिणतोमुखे॥ ॥७॥ ॥बलिंगृह्णंत्विमेदेवाआदित्यावसवस्तथा॥मरुतश्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥असुरायातुधानाश्चपिशाचोरगराक्षसाः॥डाकिन्योयक्षवेताळायोगिन्यःपूतनाःशिवाः॥जृंभकाःसिद्धगंधर्वानागाविद्याधरा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नगाः॥दिक्पालालोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांतिकर्त्तारोऽत्रा
द्याश्चमहर्षयः॥माविघ्नंमाचमेपापंमासंतुपरिपंथिनः॥सौम्याभवंतुतृप्ताश्च
भूतप्रेताःसुखावहाः॥चरकीचविदारीचपूतनापापराक्षसी॥भूतजृंभोविरूपा
क्षोधूम्रजिह्वोमहोरगः॥एतेरक्षंतुभवनंनगरंग्राममेवच॥येकेचिद्दह्यज्ञेस्मि
न्नागतावलिकांक्षिणः॥तेभ्योबलिंप्रयच्छामिनमस्कृत्वापुनःपुनः॥ ॥चरकीय
नमःचरकीमावाहयामि॥विदार्यै॰विदारीं॰॥पूतनायै॰पूतनां॰॥पापराक्षस्यै॰पा
पराक्षसीं॰॥भूतजृंभाय॰भूतजृंभांआ॰॥विरूपाक्ष्यै॰विरूपाक्षं॰॥धूम्रजिह्वा
यै॰धूम्रजिह्वां॰॥महोरगायै॰महोरगां॰॥इतिक्षेत्रपालेनसहावाह्य॥ ७॥ ॥

MEMORIAL

जोगळेकरोपनामकहरिभट्टात्मजपरशुरामेणलिखापितंस्वार्थेपरार्थेचशुभमस्तु॥